पुस्तकमिदं राष्ट्रियसंस्कृतसंस्थानस्य पुनर्मुद्रणयोजनायां प्रकाशितम् ।

षड्दर्शनटीकाकृद्वाचस्पतिमिश्रविरचित

# न्यायवार्तिकतात्पर्यटीका

काशीस्थश्रीवल्लभरामशालिग्रामसाङ्गवेदविद्यालयाध्यापकेन
न्यायाचार्य पं० श्रीराजेश्वरशास्त्रिद्राविडेन संशोधितः ।

**राष्ट्रिय-संस्कृत-संस्थान**

मानित विश्वविद्यालय
५६-५७, इन्स्टीट्यूशनल एरिया
जनकपुरी, नई दिल्ली - ११००५८

Repimted by : Rashtriya Sanskrit Sansthan

# NYĀYAVĀRTIKA-TĀTPARYA TĪKĀ

BY

ŚRĪ VACASPATI MIŚRA

Edited by
Nyāyacārya
Paṅḍit Śrī Rājeśwara Śāstrī Drāviḍ
Professor
Sri Vallabh Ram Saligram Sangaveda Vidyalaya
Varanasi

RASHTRIYA SANSKRIT SANSTHAN
(Deemed University)
56-57, Institutional Area, Janakpuri
New Delhi - 110058

# पुरोवाक्

विदन्त्येव विपश्चितो यत्संस्कृतभाषा भारतीयां साहित्यपरम्परां तत्वंवलितां प्रज्ञाञ्च सहस्रशो वर्षेभ्य: प्रकाशयन्ती संवर्धयन्ती च राजते। इयं हि भाषा परम्परा प्रज्ञा च प्रतियुगं नवनवमात्मानं प्रस्फोरयति समाविष्करोति च। तत्र च वेदा:, शास्त्रीय वाङ्मयम्, इतिहास:, पुराणानि, काव्यानीत्यनेकरचना: विकासं गता:। ताश्च परम्परया संरक्षिताश्च। परम्परा एता आधुनिकशैल्या संरक्षितुकामं राष्ट्रियसंस्कृतसंस्थानं मुद्रणं, सान्द्रमुद्रिकानिर्माणं, सङ्गणकद्वारा संरक्षणमिति विविधप्रयासै: प्रयतमानं वर्तते। तत्राद्यं स्थानं भजते अध्ययनमध्यापनमिति स्वीयपरिसरेषु यत्र मौखिकपद्धत्या इमा: परम्परा: संरक्ष्यन्ते।

सर्वसाधनसम्पन्नेऽस्मिन्नाधुनिकलोकेऽपि ग्रन्थानां महत्ता न किञ्चिन्न्यूना दृश्यते। तत्र च कारणं सर्वजनसुलभतैव। अत एव संस्थानमपि ग्रन्थप्रकाशनकर्मणि आत्मानं सततं व्यापारयति। न केवलं स्वयं ग्रन्थान् प्रकाशयति अपि तु ग्रन्थप्रकाशनार्थमनुदानमपि दत्त्वा प्रकाशकान् लेखकाश्च प्रोत्साहयति। लोकप्रियग्रन्थमाला, शास्त्रीयग्रन्थमाला, अप्रकाशितग्रन्थप्रकाशनमाला इति विविधग्रन्थमाला: संस्थानेन प्रकाश्यन्ते। ते च ग्रन्था भृशं विद्वल्लोकेन समादृता आद्रियन्ते च। एतदतिरिच्य संस्कृतभाषाध्ययनार्थमपि स्वाध्यायशैल्या विरचिता दीक्षाग्रन्था अपि संस्थानेन प्रकाशिता लोके चिरं प्रतिष्ठां प्राप्नुवन् ये च ग्रन्था अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु आभारतं प्रधानतया पाठ्यन्ते।

एवं प्रकाशितग्रन्था अचिरादेव विद्वत्समाजस्य स्वध्यायरतानां जिज्ञासूनां छात्राणां च कृते सुलभ्या भवन्तीति संस्थानप्रकाशनानां वैशिष्ट्यं प्रयोजनञ्च चरितार्थतां याति। तादृशग्रन्थानां पुन: प्रकाशनायापि संस्थानं कटिबद्धं वर्तते। क्रमेऽस्मिन् सर्वतन्त्रस्वतन्त्रेण श्रीवाचस्पतिमिश्रेण प्रणीता **न्यायवार्तिकतात्पर्यटीका** इति नामक: न्यायवैशेषिकशास्त्रीयो ग्रन्थ: संस्थानस्य पुनर्मुद्रण-योजनान्तर्गततया प्राकाश्यन्नीयते।

न्यायवार्तिकतात्पर्यटीकायां प्रथमाध्यायस्य

# विषयसूचीपत्रम्


| | पृ० | पं० |
|---|---|---|
| मङ्गलाचरणम् | १ | ६ |
| वार्तिकारम्भप्रयोजनम् | ,, | १६ |
| वार्तिकस्थप्रथमश्लोकव्याख्या | २ | ७ |
| प्रथमसूत्रतात्पर्यकथनम् | ३ | ७ |
| वार्तिके कृतस्यापि मङ्गलस्य शास्त्रे निवेशाभावः | ३ | ३ |
| शास्त्रस्य निःश्रेयसेनसहसम्बन्धकथनम् | ३ | १२ |
| भाष्यस्यादिवाक्यतात्पर्यकथनम् | ४ | ७ |
| शास्त्रस्यनिःश्रेयसप्रयोजनकत्वाक्षेपस्तत्समाधानपर भाष्यव्याख्यानम् | ,, | १३ |
| शास्त्रस्वरूपप्रदर्शनम् | ६ | ८ |
| प्रमाणादिपदार्थानां प्रामाणिकत्वम् | ७ | ३ |
| श्रेयसां निरूपणम् | ८ | ७ |
| आत्यन्तिकदुःखनिवृत्तेःप्रवृत्त्यङ्गत्वम् | ९ | १८ |
| आत्यन्तिकश्रेयोनिरूपणम् | ८ | १५ |
| प्रवृत्तिसामर्थ्यादित्यस्यविवरणम् | १० | ८ |
| आदिवाक्याक्षेपस्तत्समाधानं च | ११ | ३ |
| प्रामाण्यस्यानुमानगम्यत्वम् | ११ | १७ |
| भाष्यस्थादिवाक्यस्यव्याख्यान्तरम् | १४ | ४ |
| अवयवार्थव्याख्यानम् | १६ | १७ |
| प्रमाणसंप्लवे आक्षेपपरिहारौ | १७ | १ |
| धारावाहिकबुद्धीनां प्रामाण्यम् | १९ | ४ |
| अनधिगतार्थगन्तृत्वस्य नप्रामाण्यरूपता | २१ | १ |
| प्रमाणस्यैव साक्षादुपलब्धिसाधनत्वम् | २३ | ४ |
| प्रमातृप्रमेयापेक्षया प्रमाणस्यसातिशयत्वम् | २५ | १ |
| अर्थग्रहणस्य तात्पर्यनिरूपणम् | २६ | १३ |
| प्रमाणपदप्रयोजनम् | २७ | १ |
| सोऽयं प्रमाणार्थोऽपरिसङ्ख्येयइतिभाष्यव्याख्यानम् | २८ | १९ |
| प्रमात्रादिचतुर्वर्गप्रमाणस्यैवार्थवत्त्वम् | २९ | २० |
| स्वातन्त्र्यपदार्थनिरूपणम् | २१ | १ |
| तत्त्वपदार्थव्याख्यानम् | ३२ | १० |
| असतोऽपि प्रमाणेनोपलब्धिः | ३३ | १५ |
| प्रथमसूत्रस्यावयवार्थः | ३५ | १२ |
| निःश्रेयसद्वैविध्यम् | ३७ | ९ |
| संशयादीनां पृथग्वचनप्रयोजनम् | ३९ | २ |
| प्रयोजनपदोपादानप्रयोजनम् | ४० | १५ |
| न्यायस्यापि प्रयोजनाश्रयत्वम् | ४१ | १५ |

जसा तथा भवितव्यम् । कुतार्किकैर्दिङ्नागप्रभृतिभिराहितमज्ञानं कुतार्किकाज्ञानामिति । ( १-३ )

अविगीतशिष्टाचारपरंपराप्राप्तः परमशिष्टेन वार्तिककृता कृतो ऽपीष्टदेवतानमस्कारो ग्रन्थे न निवेशितः । न खल्वन्यदपि मङ्गलं शास्त्रे निवेशितं प्रसिद्धतरतया मङ्गलान्तरवच्छिष्या अवगमिष्यन्तीति सर्वमवदातम् ।

तत्र संक्षेपतः प्रथमसूत्रमनूद्य तस्य तात्पर्यमाह । **प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्येतच्छास्त्रस्यादिसूत्रम् । तस्य–शास्त्रस्य । अभिसम्बन्धवाक्यम् । आ**दिग्रहणेन क्रमप्राप्तस्यैव प्रथमं व्याख्यानं युक्तं न द्वितीयादेरिति दर्शितम् । अभिमतसम्बन्धो ऽभिसम्बन्धः–शास्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावः तस्येदं सूत्रं वाक्यम् अभिसम्बन्धवाक्यम् । प्रमाणादिपदार्थतत्त्वज्ञानादित्यत्र हि तत्त्वं ज्ञायते ऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रमुच्यते । पञ्चम्या च तस्य हेतुत्वम् । न हि विषघ्नमन्त्रवत्स्वान्वयमात्रेण तदविवक्षितार्थं निःश्रेयसहेतुरिति, पदार्थतत्त्वावगमकरणतया शास्त्रमुपदिशति, न तु स्वरूपेण, तेन शास्त्रस्य निःश्रेयसे कर्त्तव्ये प्रमाणादितत्त्वावगमो ऽवान्तरव्यापार इत्युक्तं भवति । तथा च प्रामाणादिपदार्थतत्त्वं प्रतिपाद्यं प्रतिपादकं च शास्त्रमिति शास्त्रप्रमाणादिपदार्थतत्त्वयोर्ज्ञाप्यज्ञापकभावः प्रमाणादिपदार्थतत्त्वज्ञाननिःश्रेयसयोः कार्यकारणभावलक्षणश्च सम्बन्धः सूचितो भवति । तदिदमभिधेयसम्बन्धप्रयोजनप्रतिपादनार्थत्वं प्रथमसूत्रस्य । यत्पदार्थतत्त्वज्ञानस्य च यथा निःश्रेयसाधिगमं प्रत्युपयोगस्तथा ऽग्रे निवेदयिष्यते । विनिश्चिताप्तभावाश्च मुनेराप्तत्वेन तद्वाक्यात्प्रयोजनादि विनिश्चित्य प्रवर्त्स्यन्ति । आप्त-

# चौखम्भा संस्कृत भवन

संस्कृत, आयुर्वेद एवं इण्डोलाजिकल ग्रन्थों के प्रकाशक एवं वितरक

पोस्ट बाक्स नं. 1160

चौक, चित्रा सिनेमा के सामने (बैंक ऑफ बड़ौदा बिल्डिंग)

वाराणसी -221001 (भारत)

टेलीफोन :+91-542-2420414 फैक्स :+91-542-2400755

E-mail : csb.brajendra@gmail.com